नं. ~~५६~~ ८५

5759

F-3

Complete

[illegible]

भु॰ प॰ १

ॐ अथ भुवनेश्वरीस्तवराजः तन्त्रे श्रीभैरवउवाच
अधुनाशृणु देवेशि स्तोत्रं तत्वनिरूपणं सर्वस्वं भुव
नेश्वर्याः परापररहस्यकं यस्यकस्य न वक्तव्यं वि
नाशिष्याय पार्वति अस्य स्तोत्रस्य देवेशि ऋषिर्भै
रवउच्यते छंदोनुष्टुप् समाख्यातं देवता भुवने
श्वरी श्रीतत्वरूपिणी बीजं माया ह्रीं शक्तिरुच्यते
ह्रः कीलकं समाख्यातं मोक्षार्थे विनियोगकः उद्य

न्तसूर्यसहस्राभांशशांककृतशेखरां पद्मासनांस्मेरमु
खींसूर्येंद्वग्निविलोचनां रक्तवस्त्रधरांपद्मपाशांकुश
वरांकरैः दधतींभुवनेशानींध्यायेद्हृत्पंकजेशिवां ३
तिध्यानं वाग्भवंनवशिवेप्रियबीजंध्यायतेयदिन
रोम्बुलचेतः तस्यत्वच्चरणपूजनमात्राज्जायतेहिक
मलावनदासी १ शक्तिबीजमनघंसुधाकरंसायकोप
दिजपेद्हृदिभक्त्या तस्यस्वर्गललनाच्चरणाब्जैरंजयं

मु०	तिमुकुरैर्मणिगणयुक्तैः मायाबीजं योजयेन्नेमहेशि तत्त्वं
प०	मंत्री भक्तिमान् मुक्तिकांक्षी त्वत्सद्दृष्ट्यायाति त्वद्धामर
२	मंनाकस्त्रीभिर्वीज्यमानः स्वःनाले ३ त्वन्मंत्रमध्येभुव
नेश्वरीति यो नाम रंभामरिरंभकांक्षी ध्यायेद्धृदब्जे शा
2	शिरवेंडहृंडे सयाति रंभां परिरंभस्वर्गे ४ मायार्णेयः
साधको ध्यायनेंतः तस्य ब्रह्माविष्णुशिवादयस्ते देवाः
पादौ रंजयंति स्मनित्यं मौलिस्थैस्तैरिंडनीलादिरत्नैः ५

नत्त्वहृत्पिलिभवन्मन्त्रमध्येयोजपेत्तवसर्पौंकेरसा
स्त्वां देवि तस्य खलु साधकराज्ञो विश्वमेतदखिलं
वश्यमेति ६ मायाबीजं देवि मंत्रांतसंस्थं रात्रावाद्धि
ध्यायते यो हृदंतः भूमौ भूमास्तस्य पादाब्जयुग्मं रंजं
ति स्वैर्मौलिरत्नांशुभिस्तैः ७ इतीदं परमं तत्त्वं तत्त्ववि
द्यास्तवोत्तमं रहस्यं भुवनेश्वर्याः सर्वस्वं मम पार्वति
संपूज्य भुवनेशानीं यः पठेत्साधकोत्तमः तस्याष्टौ

भु॰
प॰
३
3

सिद्धयो देवि करस्थं स्या महेश्वरि अस्य स्तवस्य देवेशि
प्रभावं कथितं प्रभुः नास्मद्भुवनेश्वर्याः पंचवक्त्रै
र्न संशयः इत्येष पटलो देवि रहस्यानि रहस्यकः अ
भक्तेभ्यो न दातव्यो गोपनीयो मुमुक्षुभिः इति श्रीभु
वनेश्वरीरहस्ये तन्त्रविद्याख्यः पटलः समाप्तः ॥

पूर्णात्पूर्णतरं पूर्णं पूर्णात्पूर्णेन पूर्यते पूर्णेन पूरि
तं पूर्णेन तस्मै पूर्णात्मने नमः १ यस्मिन्विश्वं यतो वि
श्वं यद्विश्वं विश्वतश्च यत् यश्च विश्वमयो नित्यं तस्मै
विश्वात्मने नमः २